CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
SDPB

Coll. No. 323

Title Ātyma Samyāsa vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 323 Subject: Dharma Śāstra

Title: Ātura saṃnyāsa vidhi (Acc. To Angirasa)

Author: —— Scribe: ——

Date of the work: —— Date of the Ms.: ——

Place of the work: —— Place of the Ms.: ——

Size: 4.3" by 6.2" Extent: 6 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: ——

॥श्रीगणेशाय नमः॥ ॥अथांगिरसोक्तप्रकारेणातु
रसंन्यासविधिः॥ ॥तत्रादौग्रंथांतरोक्तदशविधस्नाना
दिविधिं॥ संन्यासादौवक्ष्यमाणप्रकारेणकेशानांवप
नंकार्यं॥ स्नानार्थंतीर्थंगत्वास्नात्वाहिरण्यादिस्नानं
कुर्यात्॥ तद्यथा॥ हिरण्यगर्भेतिमंत्रेणहिरण्यस्नानं
॥अग्नप्रणेतरितिभस्मस्नानं॥ मानस्तोकेतिगोमय
स्नानं॥ इदंविष्णुरितिमृत्तिकास्नानं॥ पुनंतुमेति
पंचगव्यस्नानं॥ आयंगौरितिगोरजस्नानं॥ धान्य
मसीतिधान्यस्नानं॥ घृतंघृतपावानइतिघृतस्ना
नं॥ याःफलिनीरितिफलस्नानं॥ इमंदेवाइतिव

१ न स्यति स्नानं॥ पयः पृथिव्यामिति पयस्नानं॥ मधु
वाता इति मधुस्नानं॥ पुनंतु मा इति सर्वौषधिस्ना
नं॥ जातवेदस इति तीर्थोदकस्नानं॥ अन्यैर्वरुण
दैवतमंत्रैः शतघटस्नानं॥ १५॥ ततः स्वोक्तस्ना
नविधिना स्नानं कृत्वा श्वेतवस्त्रयुग्मं परिधाय
संध्यावंदनादि तर्पणांतं कृत्वा मत्स्येशस्थापना
दि प्रायश्चित्ताचरणं कृत्वा मातृपूजादि नांदीमुख
श्राद्धं स्वस्तिवाचनं शांतिपाठं च कुर्यात्॥ इति द
शविधस्नानप्रायश्चित्तश्राद्धविधिः॥ ॥
॥ अथ त्रतापनासिंदे आतुरसंन्यासो निरूप्यते॥ १

संन्यासे सर्वत्र स्वशरीरव्यतिरिक्तं सर्वं त्यजन् संन्या
साश्रमं गमिष्यामीति संकल्प्य प्रैषोच्चारणमभय
दानमिति त्रितयं प्रधानं॥ अन्यो नांदीमुखादि दं
डग्रहणांतः क्रमकलापोस्यैवांगं॥ अत एवातु
रसंन्यासे संकल्प्य प्रैषोच्चारणमभयप्रदानात्मकं लक्ष्य
ते॥ यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदेष पंथा
ब्राह्मणादानुचिंतसेनेति संन्यासी ब्रह्मविदेव मे
वैषनगवन्निति वेदेद इत्यादिना॥ आतुरेणानु
संन्यासे न विधिर्नैव च क्रिया॥ प्रैषमात्रं समुच्चा
र्य संन्यासं तत्र कारयेदिति॥ प्रैषमात्रं कमंत्रित

यद्यातुर त्रिवैराग्यं जायते सर्वबंधुषु
तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत्॥१॥
[illegible]

आत्मश्राद्धं परित्यज्य विरजाहोमवर्जितं ॥ संन्या
समातुरे प्रोक्तं महावाक्यविवर्जितं ॥ ३ ॥
२ यमियावत् ॥ संन्यस्तमिति यो ब्रूयात्प्राणैः कंठगतै
रपि ॥ नतं क्रतुसहस्रेण फलं प्राप्नोति मानवः ॥ १ ॥
संन्यस्तमिति यो ब्रूयात्प्राणैः कंठगतैरपि ॥ स नि
त्यामंडलं भानोः परं ब्रह्माधिगच्छति ॥ २ ॥ उत्पन्ने
संकटे घोरे चोरव्याघ्रादिगोचरे ॥ भयभीतस्य सं
न्यासमंगिरामुनिरब्रवीत् ॥ ४ ॥ सोपि जीविष्यति
चेद्यथाधिकारं यथाविधि दंडादि गृहीत्वा स्वध
र्मनिष्ठो भवेदिति ॥ ॥ अथांगिरसोक्तप्रकारे
ण संन्यासविधिः ॥ ॥ प्रक्षालितपाणिः शुद्धव
स्त्रं संधार्य मंत्रस्नानं कृत्वा निरतिशयानंदावा २

२पाद

...स्यः पुत्रमस्याशिषं दधातु ॥ सर्वे भवंतु वेदाढ्याः सर्वे भवंतु सोम
पाः ॥ सर्वे पुत्रमुखं दृष्ट्वा सर्वे भवंतु भिक्षुकाः ॥ १ ॥ शिवं स्वस्त्यस्तु सर्वेभ्यः

प्तये परमहंसाश्रमाधिकारसिद्ध्यर्थमातुरविधि
ना संन्यासमहं करिष्ये इति संकल्प्य ब्राह्मणानुज्ञ
या शिखायां पंच सप्त वा केशान् स्थापयित्वा शि
ष्टान् केशश्मश्रुनखादीन् वापयेत् ॥ ततः स्ना
त्वा संध्यातर्पणादिकं कृत्वोपसनं कृत्वा तामग्नि
समारोप्य संन्यसेत् ॥ विधुरब्रह्मचारिस्नातका
नामग्नेरभावादारोपो नास्ति उत्सृष्टाग्न्यनुगता
ग्नीनामाधानकालासंभवात्समारोपो नास्ति ॥
अत्संभवे तु कर्त्तव्यमेव ॥ ततो पांसमीपं गत्वा
पउद्धृत्य पात्रे कृत्वा तोयमादायाप्सु जुहोति ॥ ॐ

एकस्मात्पात्राद्दक्षिणहस्तेन किंचि १

॰ ॐ भूः गायत्रीं प्रविशामि। तत्सवितुर्वरेण्यं। ॐ भुवः गा०। भर्गो देवस्य धीमहि। ॐ स्वः गा०॥ धियो यो नः प्रचोदयात्। ॐ भूर्भुवः स्वः गा०। तत्स० यात्। ॐ व्याहृतीं प्रविशामि भूः। ॐ व्या०। भुवः। ॐ व्या०। स्वः। ॐ व्या०। भूर्भुवः स्वः

२ एष ह वा अग्निर्योनिर्यः प्राणः प्राणं गच्छ स्वाहा यो नि
गच्छ स्वाहेति प्रथमाकृतिः। ॐ आपो वै सर्वा देवताः
सर्वाभ्यो देवताभ्यो जुहोति स्वाहेति द्वितीयाकृतिः॥
ततः पात्रस्यं कृत शेषं तोयमाप्सुः शिशान इत्यनु
पा वाके नाभिमंत्र्य ॐ पुत्रैषणायाश्च वित्तैषणायाश्च लो
कैषणायाश्च व्युत्थितोहं स्वाहेति तदुदकं हस्ते
नादाय पिबेत्॥ ॐ अनयं सर्वभूतेभ्यो मत्तः स्वा सर्वत्रवर्तते
भूर्भुवः स्वः हेति द्वितीयं पिबेत्॥ ॐ संन्यस्तं मया स्वाहेति निः
शेषं पात्रस्यमुदकं हस्तेनादाय पिबेत्॥ ततो गा
यत्रीं व्याहृतीः प्रवेश्य व्याहृतीः प्रणवे प्रवेशयेत्॥ ३

ततो विष्णुप्रार्थना॥ सर्वदेवात्मके तोये तोयाकृतिमदं द
दत्वा सर्वैः फलं त्यक्त्वा पुण्यं कुरु लम्पागतः॥१॥ आदित्यं सर्वे
ततो न्यत्य विद्वं जलमंजलिपूर्णमादाय प्राच्यां दि
शि दक्षिणस्यां प्रतीच्यामुदीच्यां मध्ये अधश्च
च दिशि तद्वमी प्रत्येकं निनयेत्॥ ततस्तद्वमी शि
खां निकृत्य विसृज्य यज्ञोपवीतं चाछित्वोन्नयमुद
कांजलिना सह गृहीत्वा॥ ॐ भूः स्वाहेत्यप्सु जु
हुयात्॥ ततो यथाजातरूपधरः सन् स्वरूपाभि
मुखऊर्ध्वबाहुः प्रैषमुच्चारयेत्॥ ॐ भूः संन्यस्तं
मया॥ ॐ भुवः संन्यस्तं मया॥ ॐ स्वः संन्यस्तं मयेति
॥ उपांशु मध्यमोच्चैः स्वरेण त्रिर्ब्रूयात्॥ अनन्तऊर्ध्वं
पुत्र गृहं न गच्छेत्॥ अभयं तमानुरक्षेत्यभिषमात्रं

ना॥ संन्यस्तं मे जगद्योनिः पुंडरीकाक्ष मोक्षद॥३॥ अहं स
र्वाभयं दत्वा गतानां परमेश्वर॥ त्वं मे शरणमापन्नो

४ यावदेत्॥जीवन्नीचेत्स्वस्थः सन् महावाक्योपदेश
पूर्वं सद्गुरुमुपसृत्य महावाक्योपदेशं लब्ध्वा क्रम
संन्यासविधिमाचारेणैव जनयेत्॥उपदेशं विना
तदानीमेव मरणे यति संस्कारविधिनैव संस्कार
नारायणबलिपार्वणश्राद्धनादि कुर्यात्॥इत्यातु
र संन्यासप्रकारः॥अत्र मूलवचनानि॥आतुराणां
विशेषोस्ति न विधिर्नैव च क्रिया॥प्रैषमात्रं तु संन्या
सस्यातुराणां विधीयते॥१॥गत्वोदकसमीपं तु पात्र
योरुपकल्परेत्॥तयोरेकं करेणाथ गृहीत्वा दक्षिणे
न वै॥२॥आपो वै त्वेष इत्यादि मंत्राभ्यां जुहुयात्सुधीः॥ ४

कृत्वाहुतिद्वयं पश्चात्पात्रस्याहुतिशेषकं॥३॥आ
पुः शिशानो वृषभोनुवाकेनाभिमंत्रयेत्॥पुत्रैषण
त्यागेति मंत्रेणानेन हुत्वा पिबेज्जलं॥[illegible]॥द्वितीयमन्
यं सर्वैः सेवमुक्त्वापि पिबेद्द्विजः॥ॐ भूर्भुवः सुवरिति
पिबेच्छेषं न शोषयेत्॥५॥आदायांजलिना तोयमन्त
न्त्रान्ति दिशं क्षिपेत्॥आदित्याभिमुखो भूत्वा चोर्ध्व
बाहुरनंतरं दितः॥६॥संन्यस्तोहमिति मंत्रं त्रिवार
मभ्यसेद्बुधः॥ततः परं गृहं वेश्म नगरं वा जिह्वको
न वेत्॥७॥मनेतु निक्षिपेत् समाप्नुदके वायपा
विधिः॥सोमयाजिनवेन्प्राजापत्या वैश्वानरीत

५

था ॥८॥ अथ धानवीयानि हुत्वा सर्वदेवसदक्षिणां
॥ यद्यशक्तो न वेदादवनाये जुहुयात्सुधीः ॥९॥
देवतायै प्रधानायै पूर्णाहुतिमनुत्तमां ॥ असौ स्व
र्गाय लोकाय स्वाहेति ज्वालयेत्ततः ॥१०॥ पात्रा
णि मन्मयानां तु त्रके पोक्षु विधायते ॥ स्वयंते
इस्ताभ्यामग्निमन्यस्तान्समापयेत् ॥११॥ ततः आतु
र संन्यासं कुर्यात्सर्वविधानतः ॥ उक्तः आतुर
संन्यास आलोक्यांगिरसो मतः ॥१२॥ इत्यांगि
रसीये आतुरसंन्यासप्रकारः ॥ ॥ ॥

५

वि
अथ संन्यासदीपिकायां ॥ अथ प्राङ्मुखोपँष्टाय शिष्या
योदङ्मुखोपविष्टो गुरुरंतर्धानं कृत्वा जलपूर्णं शंखं
पुष्पादिभिरभ्यर्च्य द्वादशप्रणवैरभिमंत्र्य तेन जलेन
प्रणवेन शिष्यस्य शिरोभिषिंचेत् ॥ ततः शन्नो मित्र
इति शांतिं पठित्वा शिष्यमस्तके दक्षं दत्वा दक्षिण
श्रवणे प्रणवमुपदिश्य चतुर्वेदोक्तं महावाक्यमु
पदिशेत्तदर्थं च बोधयेत् ॥ संन्यासाद्ब्रह्मणः स्था
नं वैराग्यात्प्रकृतौ लयः ॥ ज्ञानात्कैवल्यमाप्नोतीति
त्रस्रा गतयः स्मृताः ॥१॥

९

मार्गशीर्षः॥केशवः॥जयंति॥विमला॥
पौषः॥नारायणः॥सानंदा॥कल्याणी॥
माघः॥माधवः॥कामप्रदा॥जया॥
फाल्गुनः॥गोविंदः॥धात्री॥सौम्या॥
चैत्रः॥विष्णुः॥दमना॥बकुला॥
वैशाखः॥मधुसूदनः॥मधुसूदनी॥सिद्धा॥
ज्येष्ठः॥त्रिविक्रमः॥त्रिविक्रमा॥पापनाशनी॥
आषाढः॥वामनः॥सुमतिप्रदा॥वारिनाशनी॥
श्रावणः॥श्रीधरः॥ललिता॥धर्मप्रदा॥
भाद्रपदः॥हृषीकेशः॥हरिवल्लभा॥शोभा॥
आश्विनः॥पद्मनाभः॥विशोका॥सुखवर्द्धिनी॥
कार्तिकः॥दामोदरः॥ज्ञानप्रदा॥उत्तया॥

९